... बृहदारण्यकोपनिषद् |

149. 'अवस्थात्रयं' किम् अस्ति?

उ. 'जाग्रतस्वप्नसुषुप्तावस्था' एव अवस्थात्रयं नाम्ना ज्ञायते |

150. चेतनायाः कति अवस्थाः सन्ति?

उ. चतस्रः | 1. जाग्रतावस्था 2. स्वप्नावस्था
3. सुषुप्तावस्था 4. तुरीयावस्था च |

151. 'माण्डूक्योपनिषद्' केन वेदेन सम्बन्धितोऽस्ति?

उ. ~~अथर्ववेदेन~~ अथर्ववेदेन |

152. अस्योपनिषदस्य नाम 'माण्डूक्योपनिषद्' कथं ~~कृतम्~~ कृतम्?

उ. "माण्डूक्य ऋषिणा" अयमोपनिषदः लिखितम्; अतः माण्डूक्योपनिषद् नाम कृतम् |

Scanned with CamScanner

153. माण्डूक्योपनिषदानुसारं जाग्रतावस्थायाः स्वरूपं स्पष्टयतु ।
उ. " जागरितस्थानो बहिष्प्रज्ञः सप्ताङ्गः एकोनविंशतिमुखः स्थूलभुग्वैश्वानरः प्रथमः पादः (आगमप्रकरणं - 3)

भावार्थः → यदा ~~भवान~~ त्वं जागरणं करोति, तदा विश्वे भवतः समानता भवति । तदा त्वं स्वेन्द्रियैः स्थूलपदार्थान् भोगयति । ~~यदा~~ त्वं सप्ताङ्गम् एकोनविंशतिमुखानां उपयोगं करोति । ~~~~ तदा स्थूलशरीरं भवति । इदमेव वैश्वानरः आत्मनः प्रथमांशः वर्तते ।

154. माण्डूक्योपनिषदानुसारं स्थूलपदार्थान् भोगाय कति अंङ्गाः उपयुज्यते ?
उ. 'सप्ताङ्ग' । मस्तकः, नेत्रद्वयं, नासिका, मूत्रपिण्डः, द्वौ पादौ ।

155. माण्डूक्योपनिषदानुसारं स्थूलपदार्थान् भोगाय कति द्वाराणां उपयोगम् करोति ?
उ. एकोनविंशतिः (१९) । पञ्चकर्मेन्द्रियाणि, पञ्चज्ञानेन्द्रियाणि, पञ्चप्राणाः मनः, बुद्धि, चितम्, अहंकारश्च ।

156. माण्डूक्योपनिषदानुसारं स्वप्नावस्थायाः स्वरूपं किम् अस्ति? स्पष्टयतु ।
उ. "स्वप्नस्थानोऽन्तः प्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः प्रविविक्तभुक्तैजसो द्वितीयः पादः" (आगमप्रकरणं - 4) ।

भावार्थः → यदा त्वं ~~स्व~~स्वप्नावस्थायां भवसि तदा सर्वाः क्रियाः मानसिकी एव भवति । जाग्रतावस्थावत् अस्याम् अवस्थायामपि सप्तावयवाः एकोनविंशतिः द्वाराणि भवन्ति परञ्च अस्याः अवस्थायाः अनुभवाः मानसिकाधारिता एव भवति । इयमेव अनुभवः ब्रह्मणः द्वितीयांशः वर्तते । अयमेव अंशः स्वप्नावस्था भवति । अस्मिन् समये आत्मा अन्तःकरणे तिष्ठति एवञ्च एकाकीरूपेण । एतदेव 'तैजस' नाम्ना ज्ञायते ।

157. माण्डूक्योपनिषदानुसारं सुषुप्तावस्थायाः स्वरूपं किम् ? स्पष्टयतु ।
उ. "यत्र सुप्तो न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यति तत्सुषुप्तम् । सुषुप्तस्थान एकीभूतः प्रज्ञानघन एवानन्दमयो ह्यानन्दभुक्चेतोमुखः प्राज्ञस्तृतीयः पादः (आगमप्रकरणम् - 5)

भावार्थः → यदा त्वं प्रगाढनिद्रायां भवसि तदा तव मनसि कोऽपि इच्छा न भवति, कोऽपि स्वप्नो न भवति । इयमेव अवस्था 'सुषुप्तावस्था'

Scanned with CamScanner

उच्यते। यदा त्वं सुषुप्तावस्थायां भवसि तदा त्वं केवलम् अद्वैतमेव पश्यसि। चैतन्यघनं विहाय न किमपि भवति। केवलं त्वम् आनन्दम् प्राप्नोति, चैतन्यं प्रति अग्रेसरति इति। इदं ब्रह्मणः तृतीयांशो वर्तते। इदमेव तृतीयांशः "प्राज्ञः" नाम्ना अभिधीयते।

158. गौडपादकारिकानुसारेण अवस्थात्रयस्य स्वरूपं स्पष्टयतु।

उ. अवस्थात्रय स्वरूपं निम्नोऽस्ति यत् -

" बहिष्प्रज्ञो विभुर्विश्वो ह्यन्तः प्रज्ञस्तु तैजसः।
घनप्रज्ञस्तथा प्राज्ञ एक एव त्रिधा स्मृतः॥ (गौडपादकारिका 1-1)

1. <u>जाग्रतावस्था</u> → अस्याम् अवस्थायां संसारस्य ज्ञानं भवति। वयं विश्व नाम्ना जानीमः। इयमेव प्रथमावस्था।

2. <u>स्वप्नावस्था</u> → यदा वयं स्वप्ने भवामः तदा मनसः एव अनुभवो भवति तदा 'तैजस' इति वदामः। इदं द्वितीयावस्था।

3. <u>सुषुप्तावस्था</u> → यदा वयं अस्यामवस्थायां भवामः तदा किमपि ज्ञानं न भवति केवलं प्रगाढनिद्रायां भवामः। तदा 'प्राज्ञः' इति वदामः। इयमेव अस्माकं तृतीयावस्था भवति परन्तु त्रिषु अवस्थासु विभु आत्मनः स्वरूपम् एक एव भवति।

Scanned with CamScanner